घृतशेषं पचेत्तत्तु पलार्द्धं लेहयेत् सदा ।
रक्तपित्तं अम्लपित्तं क्षयं श्वासञ्च नाशयेत् ॥'
शतावरीपाकः । इति रक्तपित्ताधिकारः ॥"
इति भावप्रकाशः ॥

(तथास्य सनिदानपूर्व्वरूपलक्षणं सम्प्राप्तिश्च ।
"पित्तं यथा भूतं लोहितपित्तसंज्ञां लभते तत्तथानुव्याख्यास्यामः । यदा जन्तुर्यवकोद्दालककोरदूषकप्रायाण्यन्नानि नित्यं भुङ्क्ते भृशोष्णतीक्ष्णमपि चान्यदन्नजातं निष्पावमाषकुलत्थक्षारसूपोपहितं दधिमण्डोदश्वित् कट्वम्लकाञ्जिकोपहितं वाराहमाहिषाविकमत्स्यगव्यपिशितं पिण्याकं पिण्डालकशुष्कशाकोपहितं मूलक-सर्षपलशुनकरञ्जशिग्रुकखरदूषभूस्तृणक-सुमुखसुरसकुठेरकगण्डीरकालक-पर्णासक्षवक-फणिज्झकोपदंशं सुरासौवीरतुषोदकमैरेयमेदकमधूलकशुक्तकुवलबदराम्लप्रायानुपानं पिष्टान्नोत्तरभूयिष्ठमुष्णाभितप्तो वातिमात्रमतिवेलं वा पयसा समश्नाति रौहिणीकलकङ्कापोतं वा सर्षपतैलक्षारसिद्धं कुलत्थमाषपिण्याकजाम्बवलकुचपक्वैः शौक्तिकैर्वा सह क्षीरमाममतिमात्रमथवा पिबत्युष्णाभितप्तस्तस्यैवमाचरतः पित्तं प्रकोपमापद्यते । लोहितञ्च स्वप्रमाणमतिवर्त्तते । तस्मिन् प्रमाणातिप्रवृत्ते पित्तं प्रकुपितं शरीरमनुसर्पद्यदैव यकृत्प्लीहप्रभवाणां लोहितवहानां स्रोतसां लोहिताभिष्यन्दगुरूणि मुखान्यासाद्य प्रतिपद्यते तदैव लोहितं दूषयति । संसर्गाल्लोहितप्रदूषणाल्लोहितगन्धवर्णानुविधानाच्च पित्तं लोहितमित्याचक्षते । तस्येमानि पूर्व्वरूपाणि । तद्यथा । अनन्नाभिलाषो भुक्तस्य विदाहः शुक्ताम्लरसगन्ध उद्गारश्छर्द्देरभीक्ष्णागमनं छर्द्दितस्य बीभत्सता स्वरभेदो गात्राणां सदनं परिदाहश्च मुखाद्धूमागम इव लोहलोहितमत्स्यामगन्धित्वमपि चास्यस्य रक्तहरितहारिद्रत्वमङ्गावयवशकृन्मूत्र-स्वेदलालाशिङ्घाणकास्यकर्णमलपिड़कोलिकापिड़कारामर्द्दवेदनालोहितनीलपीतश्यावानामर्च्चिष्मताञ्च रूपाणां स्वप्नदर्शनमभीक्ष्णमिति लोहितपित्तपूर्व्वरूपाणि । उपद्रवास्तु खलु दौर्ब्बल्यारोचकाविपाकश्वासकासज्वरातीसारशोफशोषपाण्डुरोगस्वरभेदाः । मार्गौ पुनरस्य द्वौ ऊर्द्ध्वञ्चाधश्च तद्बहुश्लेष्मणि शरीरे श्लेष्मसंसर्गादूर्द्ध्वं प्रपद्यमानं कर्णनासिकानेत्रास्येभ्यः प्रच्यवते । बहुवाते तु शरीरे वातसंसर्गादधः प्रपद्यमानं मूत्रपुरीषमार्गाभ्यां प्रच्यवते । बहुवातश्लेष्मणि तु शरीरे श्लेष्मवातसंसर्गाद्द्वावपि मार्गौ प्रपद्यते । तौ मार्गौ प्रपद्यमानं सर्व्वेभ्य एव यथोक्तेभ्यः खेभ्यः प्रच्यवते शरीरस्य । तत्र यदूर्द्ध्वभागं तत्साध्यं विरेचनोपक्रमणीयत्वात् बह्वौषधत्वाच्च । यदधोभागं तद्याप्यं वमनोपक्रमणीयत्वात् अल्पौषधत्वाच्च । यदुभयभागं तदसाध्यं वमनविरेचनायोगित्वादनौषधत्वाच्च । रक्तपित्तप्रकोपस्तु खलु

रक्तपि

पुरा दक्षयज्ञोद्ध्वंसे रुद्रकोपामर्षाग्निना प्राणिनां परिगतशरीरप्राणानामनुज्वरमभवत् । तस्यानुकारिणो दावाग्नेरिवापतितस्यात्ययिकस्याशु प्रशान्तौ यतितव्यं मात्रां देशं कालञ्चाभिसमीक्ष्य सन्तर्पणेनापतर्पणेन वा मृदुमधुरशिशिरतिक्तकषायैरभ्यवहार्य्यैः प्रदेहपरिषेकावगाहसंस्पर्शनैर्वमनाद्यैर्वा तत्रावहितेनेति ।"
संक्षेपतोऽस्योपशमनोपायो यथा,—
"साध्यं लोहितपित्तं तद्यदूर्द्ध्वं प्रतिपद्यते ।
विरेचनस्य योगित्वाद्बहुत्वाद्भेषजस्य च ॥
वमनं नहि पित्तस्य हरणे श्रेष्ठमुच्यते ।
यश्च तत्रानुगो वायुस्तच्छान्तौ चावरं मतम् ॥
स्याच्च योगावहन्तच्च कषायं तिक्तकानि च ।
तस्माद्याप्यं समाख्यातं यद्रक्तमनुलोमगम् ॥
रक्तपित्तन्तु यन्मार्गौ द्वावपि प्रतिपद्यते ।
असाध्यमपि तज्ज्ञेयं पूर्व्वोक्तादपि कारणात् ॥
नहि संशोधनं किञ्चिदस्त्यस्य प्रतिमार्गगम् ।
प्रतिमार्गञ्च हरणं रक्तपित्ते विधीयते ॥
एवमेवोपशमनं सर्व्वशो नास्य विद्यते ।
संसृष्टेषु च दोषेषु सर्व्वजिच्छमनं मतम् ॥
इत्युक्तं त्रिविधोदर्कं रक्तं मार्गविशेषतः ॥
एभ्यस्तु खलु हेतुभ्यः किञ्चित् साध्यं न सिध्यति ।
प्रेष्योपकरणाभावात् दौरात्म्याद्वैद्यदोषतः ॥
अकर्म्मतश्च साध्यत्वं कश्चिद्रोगोऽतिवर्त्तते ।
तत्र साध्यत्वमेकं स्यात् साध्ययाप्यपरि-
क्रमात् ॥
रक्तपित्तस्य विज्ञानमिदं तस्योपदेक्ष्यते ।
यत् कृष्णमथवा नीलं यद्वा शक्रधनुष्प्रभम् ॥
रक्तपित्तमसाध्यन्तद्वाससो रञ्जनञ्च यत् ।
भृशं पूत्यतिमात्रञ्च सर्व्वोपद्रववच्च यत् ॥
बलमांसक्षये यच्च तच्च रक्तमसिद्धिमत् ॥
येन चोपहतो रक्तं रक्तपित्तेन मानवः ।
पश्येद्दृश्यं वियच्चैव तच्चासाध्यमसंशयम् ॥
तत्रासाध्यं परित्याज्यं याप्यं यत्नेन यापयेत् ।
साध्यञ्चावहितः सिद्धैर्भेषजैः साधयेद्भिषक् ॥
कारणं नाम निर्वृत्तिं पूर्व्वरूपाण्युपद्रवान् ।
मार्गौ दोषानुबन्धञ्च साध्यत्वं ब च हेतुमत् ॥
निदाने रक्तपित्तस्य व्याजहार पुनर्व्वसुः ।
वीतमोहरजोदोषलोभमानमदस्पृहः ॥"
इति चरके निदानस्थाने द्वितीयेऽध्याये ॥ * ॥
अथास्य चिकित्सायां रसाः ।

"हतं गन्धं माक्षिकञ्चैव लौहं
सर्व्वं घृष्टं त्रैफलेनोदकेन ।
लौहे पात्रे गोमयैः पाचयित्वा
रात्रौ दद्यात् रक्तपित्तप्रशान्त्यै ॥
इति सुधानिधीरसः ॥

मृताभ्रसुण्डतीक्ष्णञ्च माक्षिकं रसतालकम् ।
गन्धकञ्च भवेत्तुल्यं यष्टिद्राक्षामृताद्रवैः ॥
दिनैकं मर्द्दयेत् खल्वे सिताक्षौद्रयुतावटी ।
माषामात्रा निहन्त्याशु रक्तपित्तं सुदारुणम् ।
ज्वरं दाहं तृषां वान्तिं शोषं पित्तान्तको रसः ॥
इति रक्तपित्तान्तको रसः ॥

रक्तपि

शर्करातिलसंयुक्तं त्रिकत्रययुतन्त्वयः ।
रक्तपित्तं निहन्त्याशु अम्लपित्तहरं परम् ॥
इति शर्करादां लौहम् ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे रक्तपित्ताधिकारे ॥
अथास्य पथ्यापथ्यविधिः ।

"अधोगते छर्द्दनमूर्द्ध्वनिर्गमे
विरेचनं स्यादुभयत्र लङ्घनम् ।
पुरातनाः षष्टिकशालिकोद्रव-
प्रियङ्गुनीवारयवप्रसातिकाः ॥
मुद्गा मसूराश्चणकास्तु मर्व्वो-
सुकुष्ठकाश्चाढकवर्म्मिमत्स्याः ।
शशः कपोतो हरिणश्च लाव-
शरालिपारावतवर्त्तकाश्च ॥
वका उरभ्राश्च सकालपुच्छाः
कपिञ्जलाश्चापि कषायवर्गः ।
गवामजायाश्च पयो घृतञ्च
घृतं महिष्याः पनसं पियालम् ॥
रम्भाफलं कर्कटतण्डुलीय-
पटोलवेत्राग्रमहार्द्रकाणि ।
पुराणकुष्माण्डफलञ्च पक्व-
फलानि तद्वीजजलानि वासा ॥
स्वादूनि विम्बानि च दाड़िमानि
खर्ज्जूरधात्रीमिषिनारिकेलम् ।
कशेरुशृङ्गाटमरुष्कराणि
कपित्थशालूकपरूषकाणि ॥
भूनिम्बशाकं पिचुमर्द्दपत्रं
तुम्बीकलिङ्गानि च लाजसक्तुः ।
द्राक्षा सिता माक्षिकमैक्षवञ्च
शीतोदकञ्चौद्भिदवारि चापि ॥
सेकोऽवगाहः शतधौतसर्पि-
रभ्यङ्गयोगः शिशिरप्रदेहः ।
हिमानिलश्चन्दनमिन्दुपादाः
कथा विचित्राश्च मनोऽनुकूलाः ॥
धारागृहं भूमिगृहं सुशीतं
वैदूर्य्यमुक्तामणिधारणञ्च ।
रम्भोत्पलाम्भोरुहपत्रशय्या
क्षौमाम्बरञ्चोपवनं सुशीतम् ॥
प्रियङ्गुकाचन्दनरूषिताना-
मालिङ्गनञ्चापि वराङ्गनानाम् ।
पद्माकराणां सरितां ह्रदानां
चन्द्रोदयानां हिमवद्दरीणाम् ॥
सुशीतलानां गिरिनिर्झराणां
स्तुतिः प्रशस्तानि च कीर्त्तितानि ।
उशीरनीरं हिमवालुका च
मित्रं नृणां शोणितपित्तरोगे ॥"

अथापथ्यानि ।
"व्यायामाध्वनिषेवणं रविकरस्तीक्ष्णानि
कर्म्माणि च ।
क्षोभो वेगविधारणञ्चपलता हस्त्यश्वयानानि च ॥
स्वेदासृक्स्रुतिधूमपानसुरतक्रोधाः कुलत्थो गुड़ो
वार्त्ताकं तिलमाषसर्षपदधिक्षाराणि कौपं पयः ॥"
इति वैद्यकपथ्यापथ्यविधौ रक्तपित्ताधिकारः ॥)